# shrIvAsarasarasvatIsuprabhAtam

# શ્રીવાસરસરસ્વતીસુપ્રભાતમ્

## Document Information

Text title : sarasvatIsuprabhAtam

File name : sarasvatIsuprabhAtam.itx

Category : suprabhAta, devii, sarasvatI, devI

Location : doc_devii

Transliterated by : NA

Proofread by : NA, PSA Easwaran, Malleswara Rao

Latest update : June 11, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

November 5, 2024

*sanskritdocuments.org*

# શ્રીવાસરસરસ્વતીસુપ્રભાતમ્

ઉત્તિષ્ઠોત્તિષ્ઠ! હે વાણિ! ઉત્તિષ્ઠ! હંસિનીધ્વજે ।
ઉત્તિષ્ઠ! બ્રહ્મણો રાજ્ઞિ! ત્રૈલોક્યં મઙ્ગલં કુરુ ॥ ૧॥

જાગૃહિ ત્વં મહાદેવિ! જાગૃહિ ત્વં સરસ્વતિ! ।
જાગૃહિ ત્વં ચતુર્વેદિ! લોકરક્ષાવિધિં કુરુ! ॥ ૨॥
લોકાઃ સર્વે શુચામ્ભોધૌ નિમગ્નાસ્તાન્ સમુદ્ધર!
ત્વમેવૈકા સ્વયંવ્યક્તા સમર્થા સિકતાભવા! ॥ ૩॥

શ્રીવાણિ! સર્વજગતાં જનનિ! પ્રમોદે!
જિહ્વાગ્રવાસિનિ મનોહરિ વેધસસ્ત્વમ્ ।
વાઞ્છાપ્રદાયિનિ! સમાશ્રિતભક્તકોટેઃ
શ્રીપદ્મજાતદયિતે! તવ સુપ્રભાતમ્! ॥ ૪॥

તવ સુપ્રભાતમખિલાર્થદાયિનિ!
કમનીયગાત્રિ! કરુણાતરઙ્ગિણિ!
કમલાયતાક્ષિ! વદનેન્દુમણ્ડલે !
પરમેષ્ઠિદેવિ! સુરસુન્દરીસુતે! ॥ ૫॥

શ્રીવ્યાસપૂજિતપદામ્બુજકોમલાઙ્ગિ!
કાર્તસ્વરાઞ્ચિતવિશેષવિભૂષિતાઙ્ગિ! ।
પ્રાલેયમૌક્તિકશશાઙ્કસુશોભિતાઙ્ગિ!
શ્રીવાણિ! વાસરપુરે! તવ સુપ્રભાતમ્ ॥ ૬॥

શ્રીગૌતમીતટસમીકૃતસૈકતેન
વ્યાસેન સેચનસમાહિત શ્રીકરૈશ્ચ ।
શ્રીષોડશી મનુજસેન નિરૂપિતા ત્વં
શ્રીવાણિ! વાસરપુરે! તવ સુપ્રભાતમ્! ॥ ૭॥

વલ્લીત્રયાન્તરસુચક્રસમર્ચનેન var સુચિત્ર

શ્રીમન્ત્રવાગ્ભવસમુચ્ચય કૂટદેશે! ।
વ્યક્તાસિ રક્ષિતુમિતઃ સ્વયમેવ દેવિ ।
શ્રીવાણિ! વાસરપુરે! તવ સુપ્રભાતમ્! ॥ ૮॥

શ્રીમન્ત્રરાજતનુબીજવિરાજમાનાં
ઓઙ્કારતત્ત્વવિશદાય ગૃહીતમૂર્તિમ્! ।
ત્વાં પણ્ડિતા ભુવિ ભજન્તિ સરસ્વતીતિ
શ્રીવાણિ! વાસરપુરે! તવ સુપ્રભાતમ્! ॥ ૯॥

ઓઙ્કારપઞ્જરશુકીં નિગમાન્ત વેદ્યાં!
હ્રીં માતૃકાવરણ શ્રીંયુત બ્લૂઞ્ચ સૌરૈમ્ ।
ક્લીં સૌશ્ચ સૈઙ્ગતદશાક્ષરદેવિ વન્દે
શ્રીવાણિ! વાસરપુરે! તવ સુપ્રભાતમ્! ॥ ૧૦॥

સંસારતારકમહામનુબીજવર્ણાં
માયામયીં ગુણમયીં સગુણોદ્ભવાં ત્વામ્ ।
શક્તિત્રયાત્મકચિતીતિ જપન્તિ બુદ્ધાઃ
શ્રીવાણિ! વાસરપુરે! તવ સુપ્રભાતમ્! ॥ ૧૧॥

સૌન્દર્યવારધિતરઙ્ગ પરમ્પરાયાં
વેલાનિરૂપકમનોહરદેહદીપે ।
સર્વોપમાનનિચયસ્ય સમોપમેયે
શ્રીવાણિ! વાસરપુરે! તવ સુપ્રભાતમ્! ॥ ૧૨॥

સઙ્ગીતવાઙ્મયકલાપ્રસુહાસનેત્રિ!
રાગૈશ્ચ ષોડશસહસ્રવિધૈશ્ચ ગીતે ।
આનન્દદાયકરસૈર્ખનિભિશ્ચ પૂર્ણે
શ્રીવાણિ! વાસરપુરે! તવ સુપ્રભાતમ્! ॥ ૧૩॥

સૌભાગ્યદે! ત્વમિહ વિદ્રુમવર્ણલક્ષ્મીઃ
વિદ્યાપ્રદે! ત્વમિહ ધૌતસુધાંશુવાણિ ।
શત્રુઞ્જયે! ત્વમિહ નીલતમાલકાળી
શ્રીવાણિ! વાસરપુરે! તવ સુપ્રભાતમ્! ॥ ૧૪॥

શ્રીચક્રમન્દિરવિહારિણિ! રાજ્યલક્ષ્મિ!
રાકાસુધાકરશિરોમણિ! નીલવેણિ! ।
રાજીવલોચનશિરીષસુમાગ્રનાસે ।

શ્રીવાણિ! વાસરપુરે! તવ સુપ્રભાતમ્! ॥ ૧૫॥

કૌમારશૈલશિખરે સુખવાસયોગ્યે
સૂર્યેન્દ્રવિષ્ણુશિવપુત્રગણેશમુખ્યૈઃ ।
વાસિષ્ઠવારુણિવરૈશ્ચ સુપૂતતીર્થે
શ્રીવાણિ! વાસરપુરે! તવ સુપ્રભાતમ્! ॥ ૧૬॥

અષ્ટાબ્જપુઞ્જિતવિશેષવયોવિલાસે!
બિમ્બાધરાઞ્ચિતસુહાસવિલાસરેખે/નેત્રે! ।
કારુણ્યપૂરિતદૃગઞ્ચલરમ્યમૂર્તે
શ્રીવાણિ! વાસરપુરે! તવસુપ્રભાતમ્! ॥ ૧૭॥

ઔદુમ્બરાખ્યતરુમૂલપવિત્રદેશે
દત્તાવધૂતયતિરત્ર ગૃહીતદીક્ષઃ ।
જપ્ત્વા ત્વદીયશુભનામ બભૂવ સિદ્ધઃ
શ્રીવાણિ ! વાસરપુરે! તવ સુપ્રભાતમ્! ॥ ૧૮॥

પ્રત્યૂષરઞ્જિતનવાર્કમરીચિપુઞ્જાઃ
પ્રાન્તપ્રશાન્તપ્રકૃતિં રમણીયદૃશ્યામ્ ।
સમ્ભાવયન્તિ ચ વિરચ્ય સરસ્વતીહ
શ્રીવાણિ! વાસરપુરે! તવ સુપ્રભાતમ્! ॥ ૧૯॥

નિત્યં તવાર્ચકસુધીશ્ચ મુખારવિન્દં
શ્રીખણ્ડચૂર્ણહરિતાલસુગન્ધતીર્થૈઃ ।
બ્રાહ્મે મુહૂર્તસમયે રચનાં કરોતિ
શ્રીવાણિ! વાસરપુરે! તવ સુપ્રભાતમ્! ॥ ૨૦॥

સપ્તસ્વરાઞ્ચિતમનોહરનાદયુક્તૈઃ
પ્રાભાતકાલિકસુનાદવિનોદરાગૈઃ ।
ગાયન્તિ કોકિલમયૂરમરાલચક્રાઃ
શ્રીવાણિ! વાસરપુરે! તવ સુપ્રભાતમ્! ॥ ૨૧॥

દીક્ષાવિધાનનિયમાનુસરેણ ભક્તાઃ
ગત્વા પુરે ભવતિ! દેહિ ઘૃણાક્ષભિક્ષમ્ ।
યાચન્તિ તાનિતિ ગૃહસ્થતદાત્મરૂપાન્
શ્રીવાણિ! વાસરપુરે! તવ સુપ્રભાતમ્! ॥ ૨૨॥

યોગીશમાનસસરોવરરાજહંસિ!
ભક્તાલિમાનસસરોજવિહારભૃઙ્ગિ! ।
શ્રીચક્રષોડશમહામનુબીજવાસે
શ્રીવાણિ! વાસરપુરે! તવ સુપ્રભાતમ્! ॥ ૨૩॥

જ્ઞાનાત્મિકે! વિવિધવસ્તુવિવેકરૂપે!
ઇચ્છાત્મિકે! ભગવદાત્મસમાનરૂપે! ।
યત્નાત્મિકે! પરમધામ સમાત્તરૂપે
શ્રીવાણિ! વાસરપુરે! તવ સુપ્રભાતમ્! ॥ ૨૪॥

શિઞ્જાનકઙ્કણનિનાદવિનોદપાણે!
વીણાવિવાદનવિજૃમ્ભિતપૂર્ણરાગે! ।
વિન્યસ્તહસ્તભ્રુકુટીચુબુકાક્ષિવત્સે
શ્રીવાણિ! વાસરપુરે! તવ સુપ્રભાતમ્! ॥ ૨૫॥

કૂજન્તિ દેવિ! ચરણાયુધપક્ષિસઙ્ઘાઃ!
ગાયન્તિ દેવિ! તવ માગધવન્દિવૃન્દાઃ ।
અર્ચન્તિ દેવિ! ભુવિ વૈદિકકાવ્યશિષ્યાઃ
શ્રીવાણિ! વાસરપુરે! તવ સુપ્રભાતમ્! ॥ ૨૬॥

દિવ્યાપગાવિકસિતાચ્છસુવર્ણપુષ્પાઃ
હસ્તાશ્ચ મન્ત્રપઠનાનુરણેન દેવાઃ ।
તિષ્ઠન્તિ દેવિ! તવ મન્દિરમુખ્યમાર્ગે ।
શ્રીવાણિ! વાસરપુરે! તવ સુપ્રભાતમ્ ॥ ૨૭॥

દિક્પાલકાશ્ચ તવ પીઠકકોણદેશે
શ્રીચક્રમન્દિરનવાવરણેષુ દેવાઃ ।
સ્થિત્વા ચ મઙ્ગલપુરશ્ચરણં પઠન્તિ
શ્રીવાણિ! વાસરપુરે! તવ સુપ્રભાતમ્! ॥ ૨૮॥

ઇત્થં સરસ્વતિ! કૃતં ચિનવેઙ્કુનેન
વેદાન્તમન્ત્રજપપાઠવિધાનપૂર્વમ્ ।
પારાયણેન ચ પવિત્રચરિત્રગાનં
પુણ્યાવહં સકલમઙ્ગલસુપ્રભાતમ્! ॥ ૨૯॥

ઇતિ શ્રીવાસરસરસ્વતીસુપ્રભાતં સમાપ્તમ્ ॥

NA, PSA Easwaran, Malleswara Rao

*shrIvAsarasarasvatIsuprabhAtam*

pdf was typeset on November 5, 2024

Please send corrections to *sanskrit@cheerful.com*